PDF brought to you by ResPaper.com

# ICSE Specimen 2013 Sanskrit

**Answer key / correct responses on:**

Click link: http://www.respaper.com/icse/774/7430.pdf

Other papers by ICSE : http://www.respaper.com/icse/

**Upload and share your papers and class notes on ResPaper.com. It is FREE!**
**ResPaper.com has a large collection of board papers, competitive exams and entrance tests.**

http://www.respaper.com/

# SANSKRIT

(*Three hours*)

***Answers to this Paper must be written on the paper provided separately.***

*You will **not** be allowed to write during the first 15 minutes.*

*This time is to be spent in reading the question paper.*

***The time given at the head of this Paper is the time allowed for writing the answers.***

*This paper comprises of two Sections; **Section A** and **Section B**.*

*Attempt **all** the questions from Section **A**.*

*Attempt any **four** questions from Section **B**, answering at least **one** question each from the **two** books you have studied and any **two** other questions.*

*The intended marks for questions or parts of questions are given in brackets [ ].*

## SECTION A (40 Marks)

*Attempt **all** questions*

**Question 1**

Write a short composition in **Sanskrit** of **150-200** words on any **one** of the following topics :— [15]

अधोलिखितेषु विषयेषु एकं विषयं आधृत्य **150-200** शब्दपरिमितं एकं लघुनिबन्धं **संस्कृतभाषया** लिखत :—

(i) स्वातन्त्र्योत्सवः ।

**(ii)** भारते जनसंख्या समस्या ।


**(iii)** विज्ञानस्य महत्त्वम् ।

**(iv)** परोपकाराय सतां विभूतयः ।



Click for Answer Key: http://www.respaper.com/icse/774/7430.pdf

(v) (Picture composition) प्रस्तुतं चित्रं आधृत्य **संस्कृतभाषया** एकं लघुनिबन्धं लिखत :—



## Question 2

Write a letter in **Sanskrit** on any **one** of the following topics :— [7]

अधोलिखितयो: विषययो: एकं विषयम् आधृत्य **संस्कृतभाषया** पत्रमेकं लिखत :—

**(i)** भारतवर्षस्य ऋतूनां वर्णनं कुर्वन् इंग्लैंडवासिनं स्वकीयं मित्रं पत्रमेकं लिखत।

**(ii)** विद्यालयात् दिनद्वयस्य अवकाशं ग्रहीतुं प्रधानाचार्यं प्रार्थनापत्रमेकं लिखत।



Click for Answer Key: http://www.respaper.com/icse/774/7430.pdf

## Question 3

Read the passage given below carefully and answer in **Sanskrit** the questions that follow :—

अधोलिखितं गद्यांशं ध्यानेन पठत। तस्य अधोलिखितानां प्रश्नानां उत्तराणि **संस्कृतभाषया** लिखत :—

कस्मिंश्चिद्वने नद्याः तीरे एकः वटवृक्षः आसीत्। तत्र अनेके खगाः रात्रौ निवसन्ति स्म। अथ कदाचित् प्रातः एकः व्याधः तत्र आगत्य तण्डुलान् विकीर्य जालं प्रासारयत्। स्वयं च एकस्मिन् स्थाने निलीनः अतिष्ठत्। किंचित् कालानन्तरं चित्रग्रीवनामकः कपोतराजः सपरिवारः तत्र आगच्छत्। यदा सः तण्डुलकणानपश्यत् सः तु स्वकीयान् सहचरान् अकथयत्–"शीघ्रमेव उड्डीयन्ताम् अत्र विपत्तिः सन्निकटा दृश्यते।" तस्य सहचराः तस्य वचनानि उपेक्ष्य अवदन्– "अरे ! अत्र तण्डुलाः एव तण्डुलाः दृश्यन्ते । आगच्छत, खादेम।" कपोतराजः अकथयत् — "सर्वथा विचार्य एव कार्यं कर्तव्यम्" इति।

तस्य वचनं श्रुत्वा सहचराः अब्रुवन्–"आपत्तिकाले विचार्य कर्तव्यं न चास्मिन् भोजनादिके।" इत्युक्त्वा ते तण्डुललोभात् भूमिम् आगत्य तण्डुलेषु अपतन् जाले च निबद्धाः अभवन्। ततः कपोतराजः तानुवाच–"अस्माकं रक्षा तदैव भविष्यति यदा वयं सर्वे मिलित्वा जालम् आदाय सहैव उत्पतेम।" तैः तथैव कृतम्। तान् जालसहितान् आकाशगतान् दृष्ट्वा व्याधः निराशः अभवत् गृहं चागच्छत्।

ते कपोताः स्व मित्रस्य मूषकराजस्य हिरण्यकस्य समीपमागच्छन्। हिरण्यकः तेषां जालम् अकर्तयत् तान् बन्धनादमोचयत् च एवं परस्पर सहयोगेन ते स्वकीये कार्ये सफला अभवन्।

**(i)** व्याधः तत्रागत्य किमकरोत् ? [2]

**(ii)** व्याधः कथं निलीनः अतिष्ठत् ? [2]

**(iii)** जाले बद्धान् सहचरान् दृष्ट्वा चित्रग्रीवः तान् किम् उपायम् अकथयत् ? [2]

**(iv)** चित्रग्रीवस्य उपायं श्रुत्वा कपोताः किमकुर्वन् ? [2]

**(v)** अस्याः कथायाः का शिक्षा ग्रहीतुं शक्यते ? [2]



Click for Answer Key: http://www.respaper.com/icse/774/7430.pdf

**Question 4**

Answer the following according to the instructions given :—

अधोलिखितान् प्रश्नान् यथानिर्देशम् उत्तरत :—

**(i)** केवलं समासविग्रहं कुरुत :—

राजगृहम् , हरिहरौ। [1]

**(ii)** सन्धिविच्छेदं कुरुत :—

अद्यैव, अतोऽहम्। [1]

**(iii)** प्रकृतिप्रत्यय विभाजनं कृत्वा लिखत :—

द्रष्टुम् , उपविश्य। [1]

**(iv)** (क) लङ् लकारे परिवर्तनं कुरुत :—

त्वं पाठं पठसि।

(ख) संयोज्य लिखत :—

रथेन चरति। [1]

**(v)** दीर्घस्वराः के सन्ति ? [1]

**(vi)** वाच्यपरिवर्तनं कुरुत :—

(क) अहं जलं पिबामि।

(ख) मुनिः कथां कथयति। [1]

**(vii)** उच्चारणस्थानं निर्दिशत :—

च, ल। [1]

**(viii)** कोष्ठकान्तर्गतस्य शब्दस्य उचितं रूपं निर्माय रिक्तस्थानं पूरयत :—

(क) राजा ...... अधितिष्ठति। (सिंहासन)

(ख) ऋते ...... न मुक्तिः। (ज्ञान) [1]



Click for Answer Key: http://www.respaper.com/icse/774/7430.pdf

## SECTION B (40 Marks)

*Attempt any **four** questions from Section **B**, answering atleast **one** question each from the **two** books you have studied and any **two** other questions.*

## संस्कृतवाणी—भाग-4

### दैवानुग्रहम्

**Question 5**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

तस्मिन् दिने रात्रौ सुप्तेषु गृहजनेषु हरिशर्मा जामातृ-वाहनं हयं स्थूलदत्तभवनात् अपहृत्य तं दूरे प्रच्छन्नं स्थापितवान्। परेद्युः प्रातः सेवकाः इतस्ततस्तं तुरगम् अन्विष्यन्तः अपि न अलभन्त। इयं घटना अमङ्गलसूचका इति मत्वा स्थूलदत्तः अतीव विचलितोऽभूत्। अस्य अवसरस्य सदुपयोगं कर्तुं इच्छन्ती हरिशर्मणः पत्नी स्थूलदत्तम् उपसृत्य "मम पतिः ज्योतिर्विद्या पारङ्गतः। केन अश्वः चोरितः इति ज्ञातुं स समर्थः। भवान् तं आहूय पृच्छतु" इति अवदत्। श्रुत्वेदं संतुष्टः स्थूलदत्तः सत्वरं हरिशर्माणम् आह्वयत्।

**(i)** विवाहसमये हरिशर्म किं कृतवान् ? [2]

**(ii)** हरिशर्मणः पत्नी स्थूलदत्तं उपसृत्य किमवदत् ? [2]

**(iii)** राज्ञा दत्तं परीक्षायां जेतुं असमर्थमिति मत्वा हरिशर्मः किमिति अचिन्तयत् ? किमवदत् च ? [3]

**(iv)** राजा हरिशर्मणे किम् अकरोत् ? कदा सर्वं साधयितुम् शक्यते ? [3]

### अमृतधारा

**Question 6**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

संस्कृतसाहित्ये सुभाषितानां वैशिष्ट्यपूर्णं स्थानं विद्यते। रामायण-महाभारत-पुराण-काव्यादिषु अन्येषु ग्रन्थेषु च यत्र तत्र सुभाषितानि कविभिः विनिवेशितानि।

**(i)** कनकं/पुरुषं कथं परीक्ष्यते ? [3]

**(ii)** सोत्साहानां नराणाम् असाध्यं नास्ति कथम् ? [2]

**(iii)** कदा तरवः नम्राः भवन्ति ? कदा सत्पुरुषाः अनुद्धताः भवन्ति ? [3]

**(iv)** के पुरुषं न विभूषयन्ति ? [2]



Click for Answer Key: http://www.respaper.com/icse/774/7430.pdf

## छात्रशिक्षणम्

**Question 7**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितम् अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

सम्यक् शिक्षणं छात्रेषु स्थैर्यं जनयति। सदाचारः शिक्षणस्य अमूल्यः पारितोषिकः। सद्विद्या शान्तिप्रदं वातावरणं जनयति। बुद्धि चित्तं यत् चिन्तयति हृदयेन तस्य सूक्ष्मतया परीक्षा करणीया। शिक्षणस्य अयं प्रमुखः उद्देश्यः। एषः एव न्यायान्याययोः विवेचन-शक्तिं जनयति। विवेचनारहितः विवेकहीनः छात्रः पशुभ्यः अपि निकृष्टतरः भवति। शिक्षणं न केवलं जीविकां परिकल्पयति परं योग्यं जीवनम् अपि ददाति।

**(i)** सम्यक् शिक्षणं छात्रेषु किं किं जनयति ? [2]

**(ii)** किं शिक्षणं न भवति ? सद्विद्या का ? [2]

**(iii)** अधुना किमावश्यकमस्ति ? [3]

**(iv)** कैः किमर्थं प्रयत्नः करणीयः इति अस्मिन् पाठे उक्तमस्ति? [3]

## संस्कृतवाणी—भाग-5

### प्रार्थना

**Question 8**

Read the statement given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं वाक्यं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

विविधदेवताविषयकाणि स्तोत्राणि तत्तद्देवता-उपासकैः प्रत्यहं पठ्यन्ते।

**(i)** आञ्जनेयं किमिति वर्णनं कृतमस्ति ? [2]

**(ii)** सर्वे किं भवन्तु इति शान्ति मन्त्रे उक्तमस्ति ? [2]

**(iii)** ईशावास्यमिदं सर्वं ---' अस्य श्लोकस्य भावार्थं लिखतु। [3]

**(iv)** परमात्मा किमिति वर्णितमस्ति ? [3]



Click for Answer Key: http://www.respaper.com/icse/774/7430.pdf

## परोपकारार्थमिदं शरीरम्

**Question 9**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

वृक्षस्य अधः शार्दूलः व्याधस्य प्रतीक्षायाम् एव आसीत्। सः वृकम् अकथयत्–"भोः प्रियसखः वृक ! किमिदम् अकार्यं कृतं त्वया। आवां मृगौ। एषः व्याधः अस्माकं रिपुः। अस्माकं सर्वनाशनं एव तस्य प्रमुख ध्येयः। भवान् तु अस्य रक्षणं करोति। जीवरक्षकं त्वां सः न मुञ्चति। त्वां मारयित्वा भक्षयिष्यति सः निर्दयः व्याधः।''

(i) लुब्धकः गहनारण्यं किमर्थं गतवान् ? तत्र सः किमर्थं वृक्षमेकम् आरुह्य उपाविशत् ? [2]

(ii) व्याघ्रस्य वचनं श्रुत्वा व्याधः किं कृतवान् ? वृकः कथं तस्य जीवरक्षणं कृतवान् ? [3]

(iii) दुष्टजनेभ्यः अपकारिभ्यः किमाचरेत् इति वृकः अवदत् ? [3]

(iv) व्याधस्य प्राणरक्षणं प्रति वृकः किमवदत् ? [2]

## चतुरः रामकृष्णः

**Question 10**

Read the extract given below and answer in **Sanskrit** the questions that follow :—

अधोलिखितं अवतरणं पठित्वा तस्याधोलिखितानां प्रश्नानामुत्तराणि **संस्कृतभाषया** देयानि :—

नायकः उच्च-स्वरेण एवं प्रत्यवदत्—"वयं नरभक्षकाः ! क्षुधापीडितैः अस्माभिः तव मांसं भक्षयितुं त्वं अत्र आनीतः। त्वं साधारण-मानव इव न दृश्यसे। अतः तव मरणात् प्राक् अहं तुभ्यं एकवाक्यं वक्तुम् अनुमतिं ददामि। यदि तव वचनं सत्यं भवति तर्हि त्वां उष्णजले पक्त्वा खादिष्यामः, तव वचनम् अनृतं भवति चेत् त्वां अग्नौ दग्ध्वा खादिष्यामः। शीघ्रं वद एकं वाक्यम्। अनन्तरं तव मरणं तु निश्चितम्।'' इति।

(i) रामकृष्ण महोदयः कथं विश्वविख्यातोऽभवत् ? सः कथं पारितोषिकान् लभते स्म ? [2]

(ii) रामकृष्णः किमर्थं वनं गच्छति स्म ? [2]

(iii) नरभक्षकाः किमर्थं रामकृष्णं प्रति स्वनायकम् अपृच्छन् ? [3]

(iv) नायकः रामकृष्णं किमर्थं गृहं गन्तुम् अनुमतिं दत्तवान् ? तं किमर्थं मुक्तवान् ? [3]



Click for Answer Key: http://www.respaper.com/icse/774/7430.pdf